उत्तरे रामचरिते भवभूतिर्विशिष्यते —

महाकविरूपेण कालिदासोऽतिशेते कवीन्नन्यान्, परं नाटककृद्रूपेण भवभूतिस्तस्य प्रतिस्पर्धी। उत्तररामचरिते तु स करुणरसप्रवाहे कालिदासादपि अतिरिच्यते। अतएव 'उत्तरे रामचरिते' इति सूक्तिमुक्ता प्रसरीसर्ति। उत्तररामचरिते भवभूतेर्नाट्यकलायाः कवित्वस्य च चरमोत्कर्षो लक्ष्यते।

द्वयोरेव कविवरयोः किंचिद् साम्यं वैषम्यं चावलोक्यते। साम्यदृशा परीक्षिते सति — द्वावेव सफलौ महाकवी नाटककारौ च, द्वयोरेव भाषा वशवर्तिनी, स्वाभीष्टरसवर्णने द्वयो प्रागल्भ्यम्, द्वयोरेव मौलिकत्वं प्रतिभावशिष्टत्वं च, सहृदयहृदयहारिणी विदग्धता।

वैषम्यदृशा परीक्षिते सति — (१) कालिदास कृतिषु प्रसादो माधुर्यं च, समासाभावो दुरूहपदावलीपरित्यागश्च, परं भवभूतिकृतिषु ओजोगुणस्य भूयस्त्वं दुरूहप्रयोगः समस्ता क्लिष्टा च पदावली प्रतिपदं परिलक्ष्यते।

Scanned with CamScanner

DATE: / /

(२) कालिदासः शृङ्गाररसवर्णने चरमोत्कर्षं धत्ते, परं भवभूतिः करुण रसे। (३) कालिदासो व्यञ्जनावृत्तिप्रधानः, भवभूतिस्तु अभिधावृत्तिप्रधानः। (४) कालिदासकृतिषु कल्पनारम्यत्वम्, भवभूतिकृतिषु भावगाम्भीर्यम्, कालिदासे सरसत्वं सरलत्वं च, भवभूतौ ओजस्त्वं प्रौढिश्च, कालिदासे नैसर्गिकत्वं भवभूतौ आदर्शरूपत्वं च प्रथते। (५) कालिदासः प्रकृतिवर्णने कोमलं ललितं पक्षमाश्रीयते। भवभूतिश्च प्रचण्डं कठोरं च पक्षं विशदयति। यथा दण्डकवनवर्णनम्—

निष्कूजस्तिमिताः क्वचित् क्वचिदपि प्रोच्चण्डसत्वस्वनाः।
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः।"

करुणरसप्रवाहस्तु तथा प्रसरति यथा वर्षतौ जलौघः। प्रयत्नवारितोऽपि स प्रवाहः सैकतं सेतुमिव यत्नान् विफलयति। साधूच्यते—

वेलोल्लोल-क्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि समाधीयते तं तमन्तः।
भित्वा-२ प्रसरति बलात् कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः।

Scanned with CamScanner